

# શિવાષ્ટકમ્-પ્રભું પ્રાણનાથં વિભું

https://www.chalisa.online

|| શિવાષ્ટકમ્ ||

પ્રભું પ્રાણનાથં વિભું વિશ્વનાથં જગન્નાથ નાથં સદાનંદ ભાજાં ।
ભવદ્ભવ્ય ભૂતેશ્વરં ભૂતનાથં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 1 ॥
ગળે રુંડમાલં તનૌ સર્પજાલં મહાકાલ કાલં ગણેશાદિ પાલં ।
જટાજૂટ ગંગોત્તરંગૈર્વિશાલં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 2॥
મુદામાકરં મંડનં મંડયંતં મહા મંડલં ભસ્મ ભૂષાધરં તમ્ ।
અનાદિં હ્યપારં મહા મોહમારં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 3 ॥
વટાધો નિવાસં મહાટ્ટાટ્ટહાસં મહાપાપ નાશં સદા સુપ્રકાશમ્ ।
ગિરીશં ગણેશં સુરેશં મહેશં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 4 ॥
ગિરીંદ્રાત્મજા સંગૃહીતાર્ધદેહં ગિરૌ સંસ્થિતં સર્વદાપન્ન ગેહમ્ ।
પરબ્રહ્મ બ્રહ્માદિભિર્-વંધમાનં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 5 ॥
કપાલં ત્રિશૂલં કરાભ્યાં દધાનં પદાંભોજ નમ્રાય કામં દદાનમ્ ।
બલીવર્ધમાનં સુરાણાં પ્રધાનં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 6 ॥
શરચ્ચંદ્ર ગાત્રં ગણાનંદપાત્રં ત્રિનેત્રં પવિત્રં ધનેશસ્ય મિત્રમ્ ।
અપર્ણા કળત્રં સદા સચ્ચરિત્રં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 7 ॥
હરં સર્પહારં ચિતા ભૂવિહારં ભવં વેદસારં સદા નિર્વિકારં।
શ્મશાને વસંતં મનોજં દહંતં, શિવં શંકરં શંભુ મીશાનમીડે ॥ 8 ॥
સ્વયં યઃ પ્રભાતે નરશ્શૂલ પાણે પઠેત્ સ્તોત્રરત્નં ત્વિહપ્રાપ્યરત્નં ।
સુપુત્રં સુધાન્યં સુમિત્રં કળત્રં વિચિત્રૈસ્સમારાધ્ય મોક્ષં પ્રયાતિ ॥

|| https://www.chalisa.online ||